# Vishnuproktam Shivatattvopadesham

# વિષ્ણુપ્રોક્તં શિવતત્ત્વોપદેશમ્

## Document Information

Text title : Vishnuproktam Shivatattvopadesham

File name : viShNuproktaMshivatattvopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 24| 70-96||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 16, 2024

*sanskritdocuments.org*

# વિષ્ણુપ્રોક્તં શિવતત્ત્વોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

વિષ્ણુઃ (ઉવાચ) -

શિવતત્ત્વં શિવેનૈવ જ્ઞાયતે પરમાત્મના ।
તત્તત્ત્વજ્ઞાનમેતસ્ય કથં મમ ભવિષ્યતિ ॥ ૭૦॥

જ્ઞાતં ચેચ્છાઙ્કરં તત્ત્વં સદ્યો મોક્ષો ભવિષ્યતિ ।
કથં સ્યાત્તાદૃશં ભાગ્યં મમ સંસારિણોઽધુના ॥ ૭૧॥

યદા સંસારવિચ્છિત્તિર્ભવિષ્યતિ શિવાજ્ઞયા ।
તદા જ્ઞાતમિતિ જ્ઞેયં તત્ત્વજ્ઞાનં તુ શાઙ્કરમ્ ॥ ૭૨॥

અધુના તત્કથં જ્ઞેયં શિવતત્ત્વં મયા દ્વિજાઃ ।
જ્ઞાયતે ભૂરિતપસા શિવતત્ત્વં શિવાર્ચકાઃ ॥ ૭૩॥

વેદાશ્ચ નોત્સહન્તે યત્તત્ત્વજ્ઞાનાય શૂલિનઃ ।
કથં જ્ઞેયં મયા તત્ત્વં શિવસ્ય પરમાત્મનઃ ॥ ૭૪॥

પરં યદ્વેદવિહિતં મહાદેવસ્ય પૂજનમ્ ।
ક્રિયતે બિલ્વપત્રાદ્યૈર્યથાશક્તિ મયા સદા ॥ ૭૫॥

શિવપૂજાવિધાનં ચ ન મયા જ્ઞાયતે દ્વિજાઃ ।
તથાપિ ક્રિયતે યાવદ્જ્ઞાતં શઙ્કરપૂજનમ્ ॥ ૭૬॥

યથાકથઞ્ચિત્કર્તવ્યં નિત્યં શઙ્કરપૂજનમ્ ।
ન જ્ઞાતો વિધિરિત્યેતન્ન ત્યાજ્યં શઙ્કરાર્ચનમ્ ॥ ૭૭॥

નિત્યમવ્યભિચારેણ યઃ કુર્યાચ્છિવપૂજનમ્ ।
સ સર્વપાપનિર્મુક્તઃ શિવરૂપં પ્રયાસ્યતિ ॥ ૭૮॥

ભક્તિશ્રદ્ધાસમેતેન ભસ્મનિષ્ઠેન માદરમ્ ।
પૂજિતઃ પાર્વતીનાથો દદાતિ પરમાં ગતિમ્ ॥ ૭૯॥

શિવલિઙ્ગાર્ચનેનૈવ સન્તુષ્ટઃ પાર્વતીપતિઃ ।
પુરા મહ્યં દદૌ વિપ્રા વિષ્ણુત્વં કરુણાનિધિઃ ॥ ૮૦॥

દદી તતઃ પરં મહ્યં વૈકુણ્ઠમપિ શઙ્કરઃ ।
સુદર્શનાભિધં ચક્રં દદૌ મહ્યં તતઃ પરમ્ ॥ ૮૧॥

યસ્મૈ હૃષ્ટો મહાદેવસ્તસ્મૈ સ ગિરિજાપતિઃ ।
દદાતિ ભુક્તિં મુક્તિં ચ સ્વતન્ત્રઃ કરુણાનિધિઃ ॥ ૮૨॥

શઙ્કરારાધનેનૈવ બહવો મુનિપુઙ્ગવાઃ ।
શિવસ્વરૂપમાપન્નાઃ શિવૈકપરદેવતાઃ ॥ ૮૩॥

શિવનામસુધાપાનં યે કુર્વન્તિ શિવાર્ચકાઃ ।
નમસ્તેભ્યો નમસ્તેભ્યો નમસ્તેભ્યો નમો નમઃ ॥ ૮૪॥

યે કુર્વન્તિ પ્રયત્નેન કેવલં શિવપૂજનમ્ ।
નમસ્તેભ્યો નમસ્તેભ્યો નમસ્તેભ્યો નમો નમઃ ॥ ૮૫॥

ભવત્યનલ્પતપસા શ્રદ્ધા શઙ્કરપૂજને ।
તતોઽનલ્પતપોગમ્યઃ શઙ્કરો યાજ્ય એવ મે ॥ ૮૬॥

યેષાં બાહ્યોપચારેષુ શક્તિર્નૈવ ભવિષ્યતિ ।
તૈર્માનસોપચારૈર્વા કર્તવ્યં શિવપૂજનમ્ ॥ ૮૭॥

અનન્તવાજપેયાદિયાગાનાં યત્ફલં દ્વિજાઃ ।
તતોઽનન્તગુણં પુણ્યં શિવપૂજાવિધેઃ ફલમ્ ॥ ૮૮॥

મહાદાનાનિ યાવન્તિ તેષાં યાવત્ફલં શ્રુતમ્ ।
તતોઽનન્તગુણં પુણ્યં શિવપૂજાવિધેઃ ફલમ્ ॥ ૮૯॥

તપાંસ્યુગ્રાણિ યાવન્તિ તાવતાં યત્ફલં શ્રુતમ્ ।
તતોઽનન્તગુણં પુણ્યં શિવપૂજાવિધેઃ ફલમ્ ॥ ૯૦॥

પૌણ્ડરીકાદિયાગાનાં સ્વર્ગમાત્રં ફલં દ્વિજાઃ ।
શિવાર્ચનં તુ વેદોક્તં ચતુર્વર્ગફલપ્રદમ્ ॥ ૯૧॥

ધર્માર્થકામમોક્ષાસ્તુ પ્રાપ્તવ્યાઃ શિવપૂજયા ।
અતઃ શિવાર્ચનફલં કેન સામ્યં પ્રયાસ્યતિ ॥ ૯૨॥

શિવાર્ચનેન નશ્યન્તિ બ્રહ્મહત્યાદિકોટયઃ ।
નશ્યત્યેકા બ્રહ્મહત્યા વાજિમેધેન ચ દ્વિજાઃ ॥ ૯૩॥

શિવસ્મરણમાત્રેણ વિનશ્યન્ત્યઘકોટયઃ ।
તે ન નશ્યન્તિ કિં વિપ્રાઃ સદ્યઃ શઙ્કરપૂજયા ॥ ૯૪॥

સ્વર્ગાપવર્ગફલદં વૈદિકં શઙ્કરાર્ચનમ્ ।
તન્ન યાગાદિસદૃશં યતઃ સ્વર્ગાપવર્ગદા ॥ ૯૫॥

(તન્ન યાગાદિસદૃશં યતઃ તે સ્વર્ગૈકફલા યતઃ) ॥ ૯૫॥

શિવનામાગ્નિમાત્રેણ દગ્ધં ચેત્પાપકાનનમ્ ।
શિવાર્ચનેન દગ્ધં તન્નભવિષ્યતિ કિં દ્વિજ ॥ ૯૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુપ્રોક્તં શિવતત્ત્વોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૪। ૭૦-૯૬॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 24 . 70-96..

Notes:
Viṣṇu વિષ્ણુ delivers a detailed Upadeśa ઉપદેશ (to Dvija-s દ્વિજાઃ) about Śivatattva શિવતત્ત્વ and the merits worship of Śiva  શિવ.

Proofread by Ruma Dewan

*Vishnuproktam Shivatattvopadesham*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*